# വിജയപഥം
# കൊട്ടാരക്കര വിദ്യാഭ്യാസ ജില്ല
## SSLC PRE MODEL EXAMINATION 2022-23

PM 01 SK 10 — Time : $1\frac{1}{2}$ hr

Class : X — Score : 40

## संस्कृतम्

**निर्देशाः -**

**. 15 निमेषाः समाश्वायकालः, कालोऽयं प्रश्नानां वाचनाय उत्तराणाम् आसूत्रणाय च उपयोक्तव्यः ।**

**. प्रश्नान् प्रश्ननिर्देशान् च सम्यक् अवगम्य एव उत्तराणि लेखनीयानि ।**

**. उत्तरलेखने मूल्याङ्काः , कालः च परिगणनीयाः ।**

**. विवर्तन प्रश्नान् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिः उपयोक्तव्या**

**1. चतुर्णां** समुचितमुत्तरं कोष्ठकात् चित्वा लिखत । **4×1 = 4**

क. पि. सी देवस्या महोदयेन विरचितं महाकाव्यं किम् ?
( विशाखविजयम् , शङ्करदिग्विजयम् , केरलोदयम्, क्रिस्तुभागवतम् )

ख. भूगतौ अश्वनीसुतौ कौ ?
( परिश्रमोमिताहारौ, नकुलसहदेवौ, नलदमयन्त्यौ, नकुलसहदेवौ )

ग. किं गणे नान्तर्भवन्ति ?
( नैषधीयचरितम् , कुमारसम्भवम् , शिशुपालवधम् , मूषिकवंशम् )

घ. अभिज्ञानशाकुन्तले नायकः कः ?
( नलः, रामः , दुष्यन्तः , शिशुपालः )

ङ " अयि शुभे ! किमेवं रोदिषि ? उच्यताम् "। कस्य वचनमिदम् ?
( कृषकस्य , वासवस्य, धनिकस्य, दरिद्रस्य )।

च. शङ्करदिग्विजयम् कस्मिन् काव्यविभागे अन्तर्भवति ?
( चरित्रकाव्ये , महाकाव्ये , स्तोत्रकाव्ये , सन्देशकाव्ये )

## 2. यथोचितं पट्टिकां पूरयत 4×1 = 4

| कृति: | कर्ता | विभाग: |
|---|---|---|
| रघुवंशम् | कालिदास: | महाकाव्यम् |
| महाभारतम् | व्यास: | |
| वृक्षायुर्वेद: | | शाास्त्रग्रन्थ: |
| | महात्मागान्धि: | आत्मकथा |
| अभिज्ञानशाकुन्तलम् | | नाटकम् |

## 3. उदाहरणानुसारं पदच्छेदं लिखत 1X1 = 1

उदा - अकरोच्च - अकरोत् + च ।

अपालयच्च - + ।

## 4. अधोदत्तवाक्यात् सम्बोधनपदं चित्वा लिखत 1X1 = 1

सुराधिप: तामपृच्छत् - "अयि शुभे ! किमेवं रोदिषि ? उच्यताम् "इति ।

## 5. उदाहरणानुसारं विग्रहवाक्यं लिखत 1X1 = 1

राष्ट्रपिता - राष्ट्रस्य पिता ।

राष्ट्रपति : - ।

## 6- 10 प्रश्नेभ्यः चतुर्णाम् उत्तराणि लिखत 4X2 = 8

## 6. अधोदत्तं वाक्यं पठित्वा शतृशानजन्तौ विविच्य लिखत

भोजनाय रुदन् बालः कम्पमानः इव अपश्यत् ।

शत्रन्तम् -

शानजन्तम्-

## 7. उदाहरणानुसारं यद्यपि - तथापि उपयुज्य वाक्यानि परिवर्तयतु

उदाः - शरीरेण दुर्बलः। मनसा शक्तः भवति।

यद्यपि शरीरेण दुर्बलः तथापि मनसा शक्तः भवति

KTREDUDIS

पुस्तकम् अतिमनोहरम् ।मूल्यं तु तुच्छम् भवति ।

## 8. सूचनानुसारं गद्यक्रमं लिखत ।

भिक्षा त्वया दक्षिणहस्तदत्ता
मा ज्ञायतां वामकरेण ते सा ।
दानस्य चैव निभृतं कृतस्य
पिता फलं दास्यति गुप्तदर्शी ।।

सूचनाः - त्वया दक्षिणहस्तदत्ता सा . . . . . . . . . . ते वामकरेण मा. . . . . . . . . . . . . ।एवं निभृतं कृतस्य. . . . . . . . . . . . . . . गुप्तदर्शी . . . . . . . . . . . दास्यति ।

## 9. उदाहरणानुसारं पट्टिकां पूरयत

| लट् | विधिलिङ् |
|---|---|
| लिखति | लिखेत् |
| नमति | |
| | रचयेत् |

## 10. अधोदत्तं वाक्यं पठित्वा क्त्वान्त- तुमुन्नन्त पदे चित्वा लिखत

त्यागरास्य वैभवं ज्ञात्वा शरभोजी तं द्रष्टुम् ऐच्छत् ।

क्त्वान्तम् -

तुमुन्नन्तम् -

## 11- 13 प्रश्नेभ्यः द्वयोः उत्तरे लिखत 2 X 4 = 8

## 1 1. श्लोकं पठित्व प्रश्नानाम् उत्तराणि लिखत।

ददाति भिक्षां तु भवान् यदा तदा
न कारयेत्तूर्यनिनादमग्रतः ।
नृणां विलोकं स्तवनं च लिप्सवः
सभासु रथ्यासु च दाम्भिका: यथा ।।

1. अस्मिन् श्लोके क्रियापदं किम्?
2. परावलोकनार्थं दानं कुर्वन्तः कीदृशाः भवन्ति?

KTR EDU DIS

3. ' रथाय योग्या ' इत्यस्य एकपदं श्लोकात् चित्वा लिखतु ।

4. श्लोके ' शब्दम् ' इत्यर्थे प्रयुक्तं पदं किम्?

## 12. संभाषणांशं पूरयत ।

विनोद : - भो रमेश । भवान् - - - - - - - - आगच्छाति ।

रमेश : - विद्यालयत : आगच्छामि ।

विनोद : - अस्तु । विद्यालये जयन्ति ते सुकृतिन : इति पाठं पठितवन्त : खलु?

रमेश : - आम् । अद्य - - - - - - - - - - अधिकृत्य पठितवन्त : ।

विनोद : - स :अस्माकं राष्ट्रपिता । तस्य आत्मकथात्मकग्रन्थस्य नाम किम् ?

रमेश : - - - - - - - - - । अस्माकं पुस्तकालये तत् ग्रन्थमस्ति ।

विनोद : - आम् । - - - - - - - - - - ।

## 13. गद्यांशं पठित्वा अधोदत्तप्रश्नानाम् उत्तराणि लिखत

विश्वप्रसिद्धं संस्कृत नाटकं भवति कालिदासस्य अभिज्ञान शाकुन्तलम् । सप्ताङ्कयुक्ते नाटके ऽ स्मिन् दुष्यन्तः शकुन्तला च प्रधानकथापात्रौ भवतः । महाभारते शकुन्तलोपाख्याने वर्णिता इयं कथा कालिदास प्रतिभया अतीव हृद्या अभवत् । अभिज्ञान दर्शनप्रधानत्वादेव नाटक नाम सार्थकतां प्राप्नोति ।

अ) विश्वप्रसिद्धं संस्कृत नाटकं किम् ?

आ) अभिज्ञान शाकुन्तले कति अङ्काः सन्ति ?

इ) अभिज्ञान शाकुन्तले प्रधानकथापात्रौ कौ ?

ई) नाटकस्य नाम कथं अभिज्ञान शाकुन्तलं प्राप्नोति ?

उ) नाटकस्य इतिवृत्तं कस्मात् स्वीकृतम् ?

## 14. प्रादेशिक भाषायां विवर्तयत । 1 X 5 = 5

विविधैः कुसुमैः ग्रथिता वनमाला इव विविधैः सुभाषितैः उपदेशसम्पुष्टं भवति संस्कृतभाषा । इयं भाषा संस्कृतवाहिनी भवति । तस्यां उपदेशपराणि संस्कृति द्योतकानि च बहूनि सुभाषितानि सन्ति । भारतीयसंस्कृतेः पालनपोषणप्रसारणेषु संस्कृतभाषायाः योगदानं महदेव । एतानि सुभाषितानि धर्माचरणाय, अर्थसमाहरणाय ,कर्तव्यपालनाय ,सन्मार्गानुसरणाय च जनान् प्रेरयन्ति ।

## 15- 17 प्रश्नेभ्य द्वयोः उत्तरे लिखत । 2X 4 = 8

KTR EDU DIS

## 15. सस्यप्रभेदान्  अधिकृत्य सूचनानुसारं टिप्पणिं लिखत

तरुमहिमा ------ भूमिनिरूपणं ------------ सस्यविज्ञानं -----चतुर्धा ----------
लतारूप: ----अव्यक्तपुष्प: -------------वीरुत्---------व्रीहीगोधूमादय: -----

## 16. सूचनानुसारं जीवनचरितं लिखत

नाम - वयलार् रामवर्मा
जन्म - 1928 मार्च 25, आसप्पुष चेर्त्तला देशः
पितरौ - केरलवर्मा ,अम्बालिका च ।
प्रशस्तिः - कविः , कैरलीनगानरचयिता ।
पुरस्काराः - 1961 केरलसाहित्य अक्कादमी पुरस्कारः ।
1974 गानरचनायां राष्ट्रीयपुरस्कारः ।
देहवियोगः - 1975 ओक्टोबर् 27 दिनाङ्के ।

## 17. सूचनानुसारं कण्वस्य स्वभावमधिकृत्य टिप्पणिं  लिखत

कविकुलगुरु: --------- अभिज्ञानशाकुन्तळम् ------सप्ताङ्क: ------पतिगृहगमनं -------पितृस्नेह:-------लोकज्ञ: --------उचितोपदेश: ।

-----------------------------

KTR EDU DIS